# Naradaproktam Shivadharmanuvarnanam

# નારદપ્રોક્તં શિવધર્માનુવર્ણનમ્

## Document Information

Text title : Naradaproktam Shivadharmanuvarnanam

File name : shivadharmAnuvarNanaMnAradaproktam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 34| 27-38 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# નારદપ્રોક્તં શિવધર્માનુવર્ણનમ્

ધર્મૈર્પરૈઃ વિવિધૈઃ યત્ફલં લભ્યતે જનૈઃ ।
તદીશાર્ચનસમ્પ્રાપ્યં લીલયૈવ ન સંશયઃ ॥ ૧॥

ન બહુદ્રવ્યવિલયો ન હ્યાયાસઃ શિવાર્ચને ।
પ્રાપ્યન્તે વિપુલાન્યેવ વિમલાનિ ફલાન્યપિ ॥ ૨॥

બિલ્વપલ્લવમાત્રસ્ય પ્રદાને લિઙ્ગમસ્તકે ।
યત્ફલં પ્રાપ્યતે તત્તુ ન ધર્માન્તરકોટિભિઃ ॥ ૩॥

લિઙ્ગસૃષ્ટિઃ કૃતા પૂર્વં કરુણાસાગરેણ હિ ।
ત્રિશૂલપાણિના સેયમુત્કૃષ્ટા સૃષ્ટિદ્ભુતા ॥ ૪॥

પુરા કૈલાસશિખરે સુખાસીનં મહેશ્વરમ્ ।
હિરણ્યબાહુમીશાનં સ્વર્ણસુન્દરવિગ્રહમ્ ॥ ૫॥

શરદ્રાકેશ્વરાકારદુકૂલપરિવેષ્ટિતમ્ ।
ઉદારતારહારાણાં વિહારનિકરં પરમ્ ॥ ૬॥

જટાજૂટતડિત્કોટિનિકટેન્દુકલાધરમ્ ।
રત્નાભરણશોભાભિઃ અભિતઃ પરિવેષ્ટિતમ્ ॥ ૭॥

ત્રિલોચનં નીલકણ્ઠં સોત્કણ્ઠં ગિરિજાનને ।
અપ્રમેયમનાદ્યન્તં સચ્ચિદાનન્દલક્ષણમ્ ॥ ૮॥

પરમાનન્દદં શાન્તં મઙ્ગલાનાં ચ મઙ્ગલમ્ ।
પવિત્રાણાં પવિત્રં ચ દૈવતાનાં ચ દૈવતમ્ ॥ ૯॥

અપ્રધૃષ્યં ભવં ભીમં જરામરણવર્જિતમ્ ।
મહામૃત્યુઞ્જયં શર્વં મહારુદ્રં પિનાકિનમ્ ॥ ૧૦॥

ભક્તાનન્દપ્રદં ભવ્યં દિવ્યં વિષવિભૂષિતમ્ ।
સ્મરણેનાપિ ભક્તાનાં સર્વાભીષ્ટપ્રદાયકમ્ ॥ ૧૧॥

ગૌરીવિહારનિરતં પ્રસન્નવદનં પ્રભુમ્ ।
શમ્ભું વિલોક્ય ગિરિજા પ્રાહ તદ્વામભાગગા ॥ ૧૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે નારદપ્રોક્તં શિવધર્માનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૩૪। ૨૭-૩૮ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 34. 27-38 ..

Proofread by Ruma Dewan

*Naradaproktam Shivadharmanuvarnanam*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*